तत उत्पत्तिकथा भा०आ०९८अ० शान्तनुप्रार्थने गङ्गावाक्यं यथा। "एतच्छ्रुत्वा वचो राज्ञः सस्मितं मृदु वल्गु च। वसूनां समयं स्मृत्वाऽथाभ्यगच्छदनिन्दिता। उवाच चैव राज्ञः सा ह्लादयन्ती मनो गिरा। भविष्यामि महीपाल! महिषी ते वशानुगा। यत्तु कुर्य्यामहं राजन्! शुभं वा यदि वा शुभम्। न तद्वारयितव्याऽस्मि न वक्तव्या तथाऽप्रियम्। एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव!। वारिता विप्रियं चोक्ता त्यज्येयं त्वामसंशयम्"। वैश० उक्तिः "तथेति राज्ञा सा तूक्ता तदा भरतसत्तम। प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम्। आसाद्य शान्तनुस्ताञ्च बुभुजे कामतो वशा। न प्रष्टव्येति मन्वानो न स तां किञ्चिदूचिवान्। स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च। उपचारेण च रहस्तुतोष जगतीपतिः। दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी। मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी। भाग्योपनतकामस्य भार्य्या चोपनताऽभवत्। शान्तनोर्नृपसिंहस्य देवराजसमद्युतेः। सम्भोगस्नेहचातुर्य्यैर्हावलास्य मनोहरैः। राजानं रमयामास यथा रेमे तथैव सः। स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः। संवत्सरानृतून्मासान् बुबुधे न बहून् गतान्। रममाणस्तया सार्द्धं यथाकामं नरेश्वरः। अष्टावजनयत्पुत्रांस्तस्याममरसन्निभान्। जातं जातञ्च सा पुत्रं क्षिपत्यम्भसि भारत। प्रीणाम्यहं त्वामित्युक्त्वा गङ्गास्रोतस्यमज्जयत्। तस्य तन्नप्रियं राज्ञः शान्तनोरभवत्तदा। न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः। अथैनामष्टमे पुत्रे जाते प्रहसतीमिव। उवाच राजा दुःखार्त्तः परीप्सन् पुत्रमात्मनः। मा बधीः कस्य काऽसीति किं हिनस्ति सुतानिति। पुत्रघ्नि! सुमहत्पापं सम्प्राप्तं ते सुगर्हितम्"। स्त्र्युवाच। "पुत्रकाम! न ते हन्मि पुत्रं पुत्रवतां वर!। जीर्णोऽस्तु मम वासोऽयं यथा स समयः कृतः। अहं गङ्गा जह्नुसुता महर्षिगणसेविता। देवकार्य्यार्थसिद्ध्यर्थमुषिताऽहं त्वया सह। इमेऽष्टौ वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः। तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते। मद्विधा मानुषी धात्री लोके नास्तीह काचन। तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता। जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽक्षयाः। देवानां समयस्त्वेष वसूनां संश्रुतो मया। जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति। तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः। स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम्। एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं विजानीहि गङ्गादत्तमिमम् सुतम्"। हृत निजधेनुकान् वसून् प्रति गङ्गया वशिष्ठशापस्तत्रैवोस्यः ९९अ०। "अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः। नचापश्यत्स गां तत्र सवत्सां काननोत्तमे। ततः स मृगयामास वने तस्मिंस्तपोधनः। नाध्यागमच्च मृगयंस्तां गां मुनिरुदारधीः। ज्ञात्वा तथाऽपनीतां तां वसुभिर्दिव्यदर्शनः। ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा। यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुबालधिम्। तस्मात्सर्व्वे जनिष्यन्ति मानुषेषु न संशयः। एवं शशाप भगवान् वसूंस्तान् भरतर्षभ!। वशं क्रोधस्य सम्प्राप्त आपवो मुनिसत्तमः। शप्त्वा च तान्महाभागस्तपस्येव मनो दधे। एवं स शप्तवान् राजन्! वसूनष्टौ तपोधनः। महाप्रभावो ब्रह्मर्षिर्देवान् क्रोध समन्वितः। अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः। शप्ताःस्म इति जानन्त ऋषिं तमुपचक्रमुः। प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ!। लेभिरे नच तस्मात्ते प्रसादमृषिसत्तमात्। आपवात्पुरुषव्याघ्र! सर्वधर्म्मविशारदात्। उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः। अनुसंवत्सरात्सर्वे शापमोक्षमवाप्स्यथ। अयन्तु यत्कृते यूयं मया शप्ताः स वत्स्यति। द्यौस्सदा मानुषे लोके दीर्घकालं स्वकर्म्मणा। नानृतं तच्चिकीर्षामि क्रुद्धो युष्मान् यदब्रवम्। न प्रजास्यति चाप्येष मानुषेषु महामनाः। भविष्यति च धर्म्मात्मा सर्वशास्त्रविशारदः। पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्जयिष्यति। एवमुक्त्वा वसून् सर्वान् स जगाम महानृषिः। ततो मामुपजग्मुस्ते समेता वसवस्तदा। अयाचन्त च मां राजन्! वरं तच्च मया कृतम्। जातान् जातान् प्रक्षिपास्मान् स्वयं गङ्गे! त्वमम्भसि। एवं तेषामहं सम्यक् शप्तानां राजसत्तम!। मोक्षार्थं मानुषाल्लोकाद्यथावत्कृतवत्यहम्। अयं शापादृषेस्तस्य एक एव नृपोत्तम। द्यौराजन्! मानुषे लोके चिरं वत्स्यति भारत!। वैशम्पायन उवाच। एतदाख्याय सा देवी तत्रैवान्तरधीयत। आदाय च कुमारं तं जगामाथ यथेप्सितम्। स तु देवव्रतो नाम गाङ्गेय इति चाभवत्। द्युनामा शान्तनोः पुत्रः शान्तनोरधिको गुणैः"।

"अथापगेयं भीष्मं तं रामेणेच्छामि धीमता। रणे विनिर्ज्जितं द्रष्टुं कुर्य्यात्तदपि भार्गवः" "यदि त्वामापगेयो वै